ध्यस्यानुमानेनिश्चयकालेएवसिद्धत्वात्।यत्रयत्रधूमस्तत्रतत्राग्निरितिव्याप्तिंस्मृत्वापक्षीहेतुरि
त्यंगद्वयंस्वार्थानुमानस्यसाध्यधर्मविशिष्टस्यधर्मिणःपक्षत्वात्।तथाचस्वार्थानुमानस्यधर्मिसाधनेसाध्य
दावित्रीण्यंगानिपक्षसाधनेनैवादंगद्वयंचेतिसिद्धंविवक्षायावैचित्र्यात्।पूर्ववत्रहिधर्मिधर्मनेदविवक्षा
उत्तरत्रतुतत्समुदायविवक्षामएवधर्मिलेनाभिमतःप्रसिद्धएवतदुक्तमभियुक्तैःधर्मिद्वेधर्मीतिप्र
सिद्धत्वंचधर्मिणःक्वचित्प्रमाणतःक्वचिद्विकल्पात्।क्वचित्प्रमाणविकल्पाभ्यांतत्रप्रत्यक्षाद्यन्यतमा
वधृतत्वंप्रमाणप्रसिद्धत्वंअनिश्चितप्रामाण्यप्रमाणप्रत्ययोगोचरत्वंविकल्पप्रसिद्धत्वंतदुभयविष
यत्वंप्रमाणविकल्पप्रसिद्धत्वंतत्रप्रमाणसिद्धोधर्मीयथाधूमवत्वादग्निमत्वेसाध्येपर्वतःसर्वेषुप्रत्य
क्षेणानुपलभ्यमानेषुविकल्पसिद्धोयथासर्वज्ञोस्तियुनिश्चितासंभवद्बाधकप्रमाणत्वादित्यस्तित्वेसाध्येसर्वज्ञः
अथवाशशविषाणंनास्तीतिनास्तित्वेसाध्येशशविषाणंसर्वज्ञोहिअस्तित्वसिद्धेःप्राक्प्रत्यक्षादिप्रमाणसि
द्धेःअपित्वप्रतीतिमात्रसिद्धइतिविकल्पसिद्धोयंधर्मीतथाशशविषाणमयिनास्तित्वसिद्धेःप्राग्विकल्प

न्यायदीपि-
१४

ल्पगमः ममवेपिधर्मीतिप्रमाणविकल्पसिद्धेधर्मीप्रमाणेनयसिद्धयोर्धर्मिणोःसाध्येकामचारः
विकल्पसिद्धेनुधर्मिणिमन्नासन्नयोरवमाधत्वमितिनियमात्तदुक्तंविकल्पसिद्धेतस्मिन्नसन्नेतरे
साध्येऽतितदेवंपरोपदेशानर्थेनिर्णयमाधनात्तदङ्गत्वमानाद्धर्मिनिर्णयायासाध्येविज्ञानंततस्तस्यार्थानु
मानमितिस्थितं।।तदुक्तंपरीपदेशाज्ञानावेपिसाधनात्।।साध्यधीर्धर्मयदङ्गतयेतेस्यार्थमनुमानं।

५धर्मात्मा

तदुक्तमेतेऽतिपरोपदेशसिद्धेयेस्यतस्तस्यविज्ञानंततस्यरार्थानुमानंप्रतिज्ञाहेतुरूपपरोपदेशवशात्
श्रोतुरुत्पन्नंसाधनात्।।साध्यविज्ञानंपरार्थानुमानमित्यर्थः।।यथापर्वतोयमग्निमाननिति।।मतिर्हेति
धर्मवत्तामथानुपपन्नेशितिवाकेकेनचित्पयुक्तेतद्वाक्यार्थपर्यालोचयतःस्मृतिव्याप्तिकस्यश्रोतु
रनुमानमुपजायतेयदीपदेशवाक्यमेवपरार्थानुमानमितिकेचित्।।तएवंप्रष्टव्याःतत्किंमुख्यानु
मानमथवागौणमनुमानमितिनतावन्मुख्यानुमानंवाक्यस्याज्ञानरूपत्वात्।।गौणमनुमानंतद्वाक्यमिति
त्वनुमन्यामहेतत्कारणेतद्व्यपदेशोपपत्तेर्गुणयुक्तेघृतमित्यादिवत्।।तस्मैतत्प्रत्यायनाय परार्थानुमानवत्
परार्थानुमानप्रयोजनकत्वसाधर्म्यात्प्रतिज्ञाहेत्वोरप्युपचारतस्तद्व्यपदेशोपपत्तेः।।अतत्रधर्मिमुद्दिश्यकेरूपस्योपपत्तस्य
वचनंप्रतिज्ञायथापर्वतोयमग्निमानितिः।।साध्यविनाभाविसाधनवचनंहेतुःयथाधूमवत्वात्
थानुपपन्नेशितिथैवधूमवत्तोपपत्तेरितिवाअन्ययोहेतुप्रयोगयोर्मुक्तिवैचित्र्यमात्रंपूर्वत्रधूम

१४

व

धर्मी ५परार्थानुमानस्यांगानि।

वत्तान्यथानुपपन्नेरित्ययमर्थः।।धूमवत्त्वमग्निमत्ताभावेनुपपन्नेरितिनिषेधमुखेनप्रतिपादनं
द्वितीयेनुतथैवधूमवत्तोपपत्तेरित्ययमर्थः।।अग्निमत्त्वमित्येवधूमवत्त्वस्योपपत्तेरितिविधिमुखे
नकथनेनअर्थेसुननिद्यतेऽनयोस्साध्यविनाभाविसाधनाभिधानाविशेषात्।।ततस्तयोहेतुप्र-
योगयोरन्यतरएववक्तव्यःअनयोःप्रयोगेपौनरुक्त्यात्।।तथाचोक्तलक्षणाप्रतिज्ञाएतयोरन्य

वय

तरोहेतुप्रयोगश्चेत्पूर्वंदर्शयंपरार्थानुमानवाक्यमेतिसिद्धंतिः।।श्रुत्यन्तस्यश्रोतुःतावन्मात्रेणवा
नुमित्युदयात्।।ढानेयायिकास्तुपरार्थानुमानप्रयोगस्यथोक्तार्थस्यसम्यगुदाहरणमुपनयं
निगमनंचेतियंचावयवानाकुःतत्रार्थंचसूत्रयंतिप्रतिज्ञाहेतूदाहरणोपनयनिगमनान्यवयवाः

सांख्यमत
वाक्यं

इतितांश्चतेलक्षणपुरस्सरमुदाहरंतिस्मचात्रयथायत्रवचनेप्रतिज्ञायथापर्वतोयमग्निमानि-
तिसाधनत्वप्रकाशार्थंचयंतेलिंगवचनंहेतुःयथाधूमवत्त्वादितिव्याप्तिपूर्वकदृष्टांतवचनं
मुदाहरणंयथायोयोधूमवानसावग्निमान्यथामहानसइतिसाधर्म्योदाहरणंयोयोऽग्निमान्न
भवतिसधूमवान्नभवतिःयथामहाह्रदइतिवैधर्म्योदाहरणं।।पूर्वयोर्दाहरणयोर्देहेतोरन्यय-
व्याप्तिः।।पदर्शनेतेद्वितीयेनुव्यतिरेकव्याप्तिः।।तद्यथाअन्वयव्याप्तिप्रदर्शनेनान्वयदृष्टांतोव्यतिरे
कव्याप्तिप्रदर्शनेप्रदेशोव्यतिरेकदृष्टांतः।।एवंदृष्टांतद्वैविध्यान्नदृचनस्योदाहरणस्यापिद्वैवि-

स्थान

वाद

१५

प्रतिज्ञया

पाटीवुप्रतिपाद्यानुरोधेनेति।तदेवं प्रतिज्ञादिरूपात्यवयवदेशादुत्पन्नंपरार्थानुमानंतदुक्तंपरा
वयवदेशमात्रेचेत्साध्यनाव्यंसाध्यवैदर्मश्रीवृर्यक्रायतेमाहिपरार्थानुमितिर्मतेतितथाचस्वार्थ
चेतिद्विविधमनुमानंसाध्याविनाभावनिश्चयैकलक्षणहेतोरुत्पद्यतेऽत्यन्यथानुपपन्नेकल
क्षणोहेतुरनुमितिप्रयोजकइतिप्रथितैर्जैनाहैतमतेतदेतदवितर्क्यान्येन्यथाप्याज्ञातत्रता
वन्नथागताःपक्षधर्मत्वादित्रितयलक्षणलिंगादनुमानोत्थानुमितिवर्णयंतिःतथाहियपक्ष
र्मत्वंमयपक्षेसत्वंविपक्षाव्यावृत्तिरितिहेतोस्त्रीणिरूपाणितत्रसाध्यधर्मविशिष्टेधर्मीपक्षः यथा
धूमानुमानेयवैतःतस्मिन्वाप्यंपवर्त्तमानत्वंहेतोःमपक्षधर्मत्वंसाध्यसजातीयधर्म्मीधर्म्मीसप
क्षःअथातत्रैवमहानसःतस्मिन्सपक्षेवावर्त्तमानत्वंहेतोःमयपक्षेसत्वंसाध्यविरुद्धध
र्मीधर्मीविपक्षःअथातत्रैवमहाह्रदःतस्मात्तस्मर्वस्माद्व्यावृत्तत्वंहेतोर्वियपक्षाव्यावृत्तिःतानीमा
नित्रीणरूपाणिमिलितानिहेतोर्लक्षणमभ्यतमानावैहेतोरानासत्वंस्यादितितदसंगतंःकृतिर्को
दयादेहेतोरयपक्षधर्मस्यशाकटोदयादिसाध्यगमकत्वदर्शनात्।तथाहि।शाकटंमुहूर्त्तेनोद्वे
ष्यतिःकृतिकोदयात्।इतिश्रौत्रिहिशाकटेधर्मीमुहूर्त्तेनोदयःसाध्यःकृतिकोदयोहेतुःनहि
कृतिकोदयोहेतुःमपक्षीकृतेशाकटेवर्त्ततेअतोनयपक्षधर्मः।अथाप्यन्यथानुपपन्निर्बलाच्छाकटे

दयास्यंसाध्यंगमयत्येवतस्माद्धेत्वभिमतंहेतोर्लक्षणमव्याप्तं।नैयायिकास्तुपांचरूप्यंहेतोर्ल
क्षणमाचक्षतेःतथाहिःपक्षधर्मत्वंमपक्षेसत्वंविपक्षाव्यावृत्तिरबाधितविषयत्वंमसत्प्रतिपक्षत्वं
चेतिपंचरूपाणिःतत्राद्यानित्रीण्येकलक्षणानिसाध्यविपर्यसनिश्चायकप्रबलप्रमाणरहितत्व
मबाधितविषयत्वंतादृशसमबलप्रमाणभूत्यमेत्वमत्प्रतिपक्षत्वं।तद्यथा।यर्वतीयमग्निमानधू
मवत्वात्।योयोधूमवान्सोग्निमान्यथामहानसःयोयोग्निमान्नवतिसधूमवान्नवति
यथामहाह्रदस्तथाचायंधूमवांस्तस्मादग्निमानेवेति।अत्रहेत्वग्निनासाध्यधर्मेणविशिष्टःपर्वतो
धर्मीपक्षः धूमवत्वंहेतुःतस्यचतावत्पक्षधर्मत्वंमसिपक्षीकृतेपर्वतेवर्त्तमानत्वात्मयपक्षे
त्वंमप्यस्ति।महानसेवर्त्तमानत्वात्।नसुकेषुचित्सपक्षेषुधूमवत्वेनवर्त्तते।अंगारशवस्थपा
ग्निमत्सुप्रदेशेषुधूमाभावादितिचेत्तन्मपक्षेकदेशवृत्तेरपिहेतुत्वात्।मपक्षेसर्वत्रैकदेशेवावृ
त्तिहेतोःमपक्षेसत्वमित्युक्तत्वात्।विपक्षाव्यावृत्तिरप्यस्तिधूमवत्त्वस्यमर्वमहाह्रदादिविपक्ष
व्यावृत्तेःअबाधितविषयत्वमप्यस्तिधूमवत्त्वस्यहेतोर्योविषयोग्निमत्वाख्यंसाध्यंतस्यप्रत्यक्षादि
प्रमाणबाधितत्वात्।अमत्प्रतिपक्षत्वमप्यस्त्यग्निरहितत्वसाधकसमबलप्रमाणसंभवात्
तथाचपांचरूप्यसंपन्नेरेधूमवत्त्वस्यसाध्यसाधकत्वेनिर्बंधनंएवमेवमन्येषामपिमहेतूनां।

DR. BHAU DAJI MEMORIAL

रूपपंचसंपत्तिरूपहानीया ॥ तदत्र विरुद्धादेवखलुपंचहेत्वाभासाः ॥ अभिद्धविरुद्धानैकांतिककालात्ययापदिष्टप्रकरणसमाख्याः ॥ तत्राहि ॥ अनित्यशब्दःप्रमेयत्वादित्यभिद्धः ॥ यथाअनित्यः शब्दःश्रावणत्वात् ॥ अत्रहि ॥ चाक्षुषत्वंहेतुः ॥ यद्धीकृतेशब्देनवर्तते ॥ श्रावणत्वात्चशब्दस्यतथापक्षधर्मविरुद्धादसिद्धत्वंचाक्षुषत्वस्यसाध्यविपरीतनित्यत्वेनव्याप्तेर्विरुद्धः ॥ यथानित्यःशब्दःकृतकत्वादितिकृतकत्वंहेतुः ॥ साध्यभूतनित्यत्वविपरीतेनानित्यत्वेनव्याप्तः सयत्रेगगनादावविद्यमानो ॥ विरुद्धः ॥ सव्यभिचारोनैकांतिकः ॥ यथाअनित्यः शब्दःधर्मेयत्वादितिप्रमेयत्वंहिहेतुः ॥ साध्यभूतानित्यत्वंव्यभिचरतिगगनादौविपक्षेनित्यत्वेनापिसहदृष्टेः ॥ ततोविपक्षाद्व्यावृत्तोगगनादेर्नैकांतिकोबाधितविषयः कालात्ययापदिष्टः ॥ यथाअग्निरनुष्णःप्रमेयत्वादितिअत्रयद्यर्थत्वंस्वविषयेनुष्णत्वेनुष्णत्वयाहकेणप्रत्यक्षेणबाधितेप्रवर्त्तमानः अबाधितविषयत्वान्बाल्कालात्ययापदिष्टः ॥ प्रतिसाधनप्रतिरुद्धोहेतुः प्रकरणसमः ॥ यथाअनित्यः शब्दोनित्यधर्मरहितत्वात्इतिः ॥ अत्रहिनित्यधर्मरहितत्वादितिहेतुः ॥ प्रतिसाधनेनप्रतिरुद्धः ॥ किंतत्प्रतिसाधनमितिचेत् ॥ नित्यः शब्दःअनित्यधर्मरहितत्वादितिनित्यत्वसाधनम् ॥ तत्रचासत्यतियत्नत्वान्नावात्मकः १७
रणसमत्वादितिहेतोः ॥ तस्मात्यंचरूपंहेतोर्लक्षणमन्यतमान्नवेहेत्वाभासत्वंप्रसंगादितिसूत्रं

त्वंनित्यधर्मरहित

संग

हेतुर्लक्षणरहितान्हेत्वदवनाममानाः खलुहेत्वाभासाःपंचरूपात्यतमशून्यत्वाद्धेतुर्लक्षणरहितत्वंकतिपयरूपैर्हिहेत्वैदवनाममानत्वमितिवचनादितिः ॥ तदेतद्दूषणेनयायिकाभिमतमनुपपन्नंकृतिकौदीयस्यपक्षधर्मेरहितस्यापिशाकटोदयंप्रतिहेतुर्दर्शनात्पांचरूप्यस्याभावेः ॥ किंचकेवलान्वयिकेवलव्यतिरेकिणोहेतोःपांचरूप्याभावेपिगमकत्वंतैरेवोपगम्यतेः ॥ तथाहिः ॥ तेमन्यंतेत्रिविधोहेतुः ॥ अन्वयव्यतिरेकीकेवलान्वयीकेवलव्यतिरेकीचेतिः ॥ तत्रपंचरूपोपपन्नोन्वयव्यतिरेकी ॥ यथाशब्दोऽनित्योऽविद्यमहीतिकृतकत्वात् ॥ यद्यत्कृतकंतदनित्यंयथाघटः ॥ यद्यदनित्यंननभवतितत्तत्कृतकंननभवतियथाकाशंतथाचायंकृतकः तस्मादनित्यएवेति ॥ अत्रशब्दोयद्धीकृत्वानित्यत्वंसाध्यतेतत्रकृतकत्वंहेतुः ॥ तस्ययद्धीकृतशब्दःधर्मीत्वात्तद्धीधर्मीतस्यपक्षधर्मेत्वमस्तिमयपक्षेघटादौवर्त्तमानत्वात्क्रियाहेतुगगनादावविद्यमानत्वात्दृष्टयतिरेकिसंपक्षसपक्षदृष्टिविपक्षाद्व्यावृत्तिरहितः केवलान्वयियथाद्दृष्टादयः कस्यचित्प्रत्यक्षोः अनुमेयत्वात्यद्यदनुमेयंतत्तत्कस्यचित्प्रत्यक्षोःयथाधूमादिरितिअत्रदृष्टादयः पक्षः कस्यचित्प्रत्यक्षत्वंअनुमेयत्वंहेतुः ॥ अस्माद्यत्वंयद्दृष्टांतः ॥ अनुमेयत्वंहेतुः ॥ यद्धीकृतेदृष्टादौवर्त्ततेसपक्षभूतेघटादौवर्त्ततेततः ॥ यत्पक्षधर्मत्वंसपक्षेसत्वंचास्ति ॥ विपक्षःपुनरत्रनास्तिसर्वस्मादपिपक्ष

मयदृष्टांतर्मावान्नास्ति पक्षाद्यावृत्तिर्नीलेऽवयविसाधनेऽकृतकत्वादवयिनि पक्षस्य
नावात्शेषमन्वयव्यतिरेकवददृष्टं पक्षवृत्तिर्विपक्षाद्व्यावृत्तिश्च पक्षस्य हेतोर्हेतुः केवलव्य
तिरेकीयथाजीवच्छरीरंसात्मकंनविनर्हतिप्राणादिमत्वात्॥यद्यत्सात्मकंनभवतितन्नत्प्रा
णादिमन्नभवतियथालोष्ठमितिअत्रजीवच्छरीरंयत्सात्मकंत्वंसाध्यंप्राणादिमत्वंहेतुःलो
ष्ठादिव्यतिरेकदृष्टांतः॥प्राणादिमत्वंहेतुः पक्षीकृतेजीवच्छरीरेवर्त्ततेविपक्षाल्लोष्ठादेर्व्यावृत्ते
र्नेमपक्षःपुनरत्रनास्तेयमर्वस्मादिपक्षविपक्षांतर्भावादितिशेषंपूर्ववत्॥एवमेतेषांत्रयाणां
हेतूनांमध्येन्वयव्यतिरेकिणःएवपांचरूप्यंकेवलान्वयीविपक्षाद्व्यावृत्तोनावात्केव
लव्यतिरेकिणःसंदेहात्॥यदेतत्वाभासत्रयंनयायिकमतानुसारेणोक्तंपांचरूप्यव्यभिचारः अन्य
थानुपपन्नत्वमेवहेतुव्याप्तत्वाद्धेतोर्लक्षणमुचितंतदभावेहेतोरसाधकत्वमकलाघटनात्॥
यदुक्तमसिद्धादिदोषपंचकनिवारणायकमेणपंचरूपाणीति तत्र॥अन्यथानुपपन्नत्वं
नश्चितत्वेसैवास्मदभिमतलक्षणंप्रतिनिवारकत्वमिदं॥तथाहि॥साध्यान्यथानुपप
न्नत्वेसतिनिश्चयपथप्राप्तत्वंखलुहेतोर्लक्षणंसाध्याविनाभावित्वेननिश्चितोहेतुरिति॥
वचनात्तदेतदसिद्धस्यास्तिज्ञानंतत्साधनायानिष्टेतस्यचक्षुषादेः॥स्वरूपसिद्धत्वे

कृतोन्यथानुपपन्नत्वेननिश्चयपथप्राप्तिः॥नन्यथानुपपन्नत्वेनाततः साध्यान्यथानुपपन्नत्व
लेननिश्चयपथप्राप्तनावादेवास्महेत्वाभासत्वेननुपपन्नधर्मत्वाभावात्॥अपक्षधर्मस्यापिकृ
त्रिकोदयादेर्यथोक्तलक्षणसंपन्नैरेवसहेतुत्वप्रतिपादनान्नविरुद्धादेस्तुतदभावःस्पष्ट ए
वनहिविरुद्धस्यव्यभिचारिणोवाध्वितविषयस्यासत्प्रतिपक्षस्यवान्यथानुपपन्नत्वेननिश्च
यपथप्राप्तिरस्तितस्माद्यस्यान्यथानुपपन्नत्वेसतियोग्यदेशेनिश्चयपथप्राप्तिरस्तिसएव
महेतुरपरस्तदाभासइतिस्थितंतर्किंचाग्नेर्योमैत्रतनयःसएवामोनवित्तमर्हतिमैत्रतनयत्व
त्संप्रतिमैत्रतनयविदित्यत्रापिपंचरूप्यंपांचरूप्ययोर्वीध्येयोगात्तिरोरतिव्याप्तेरलक्षणत्वात्
थाहि॥यद्दृश्यमानेषुयंचुमैत्रपुत्रेषुदृश्यमानासुयलज्यतज्ञायोगेनगतमपिविवादास्पदंमैत्र
कृत्यदृश्यमत्वसाधनायपक्षीकोमैत्रतनयारम्योहेतुरानामऽतितावत्पक्षमिदंअस्यामत्वस्यापि
तत्रसंनावितत्वात्तत्संनावनायचस्यामत्वंप्रतिमैत्रतनयत्वस्यान्यथानुपपन्नत्वाभावात्तदना
वश्यसहक्रमनावनियमानावात्॥यस्माद्धिधूमस्यैनधूमेनसहनावनियमःसतंगमयतियथा
शिंशपात्वस्यवृक्षत्वेनसहनावनियमोस्तीतिशिंशपात्वंहेतुवृक्षत्वंगमयतियस्मचक्रमे
नावनियमःसतंगमयतियथाधूमस्याग्नेरनावनियमोस्तीतिधूमोग्निंगमयतिनहिमैत्रतन

स

यत्वैहेतुत्वानिमतस्यस्यामत्वेनमाध्यत्वानिमतेनसहनाव्यक्रमनाबोवानियतोस्तियेनमैत्रन
नयत्वेहेतुःस्यामत्वंमाध्यंगमयेत्तथाह्यपिसंप्रतिपन्नमैत्रंतनयत्वयोःसहनाबोस्तिःतथापि
नासौनियतःमैत्रतनयत्वमसुतृप्तामत्वंमास्तुदुत्वेवंरूपेविपक्षेबाधकाभावात्विपक्षेवा
धकप्रमाणबलात्खलुहेतुमाध्यन्नियमयोनियमयतिव्याप्तिनिश्चयःव्याप्तिनिश्चयतस्सहनाबोव्यक्र
मनाबोवासहक्रमनाबनियमोविनाभावइतिवचनात्विवादाध्यासितोहेतुर्नविनुमर्हति
शिंशपात्वाद्यथाशिंशपायामसत्त्वःथथासंप्रतिपन्नइत्यत्रहिहेतुरसुमाध्यंमानुदिश्येतस्मिन्
विपक्षेसामान्यविशेषभावेनैगमप्रसंगोबाधकःइत्तलैहिसामान्यंज्ञियालंतद्विशेषःनहिसि
शेषःसामान्यनविसंभवतिःनचैवंमैत्रतनयत्वमसुतृप्तामत्वंमास्तिमुंकेकिंचिद्बाधकमस्तिते
स्मान्मैत्रतनयत्वंहेत्वाभासएवातस्यतावत्सद्धर्मत्वमस्तियद्धीरुतेगर्भस्थेतत्सज्ञावात्तमय
क्षेषुसंप्रतिपन्नपुत्रेवृतस्यविद्यमानत्वात्पक्षेसत्वमप्यस्तिविपक्षेभ्यःपुनरस्यामैत्र्यश्चेत्रपु
त्रेगौण्यावृत्तेर्मानत्वाद्विपक्षाद्व्यावृत्तिरस्तिविपक्षबाधकाभावादबाधितविषयत्वमस्तिनहिगर्भ
स्थस्यरूपमत्वंकेनचित्प्रबाधतेअमत्यतिपक्षत्वमप्यस्तिप्रतिकूलसमबलप्रमाणाभावादिति १७
पांचरूप्यसंपन्नोहेरूप्यंमहसैज्ञातव्यायेनसुतरांसिद्धेनबुधनपांचरूप्यमात्रेहेतोर्लक्षणेकिं

तर्ह्यन्यथानुपपन्नत्वलक्षितमेवलक्षणमितिचेत्तर्हिमैकांतिकत्वलक्षणमस्कृतदनावेपांच
रूप्यसंपन्नावपिमैत्रतनयत्वादीनहेतुत्वंतज्ञावेपांचरूप्याभावेविपक्षतिकोदयादीहेतुत्वमि
तिःतदुक्तंःअन्यथानुपपन्नत्वंयत्रतत्रत्रयेणकिंःअन्यथानुपपन्नत्वंयत्रतत्रत्रयेणकिंमिति
वीधाप्रतियोगंप्रतितुअन्यथानुपपन्नत्वंयत्रकिंतत्रपंचभिःःअन्यथानुपपन्नत्वंयत्रकिंत
त्रपंचभिरितिमोयमन्यथानुपपत्तिनिश्चयैकलक्षणोहेतुःसंचेयांतोविधिविधिः विधिरूपःप्रति
षेधरूपश्चेति विधिरूपोपिद्विविधःविधिसाधकःप्रतिषेधस्साधकश्चेतिःतत्राद्योनेकधाःः
तत्राद्यःकश्चित्कार्यःरूपःअथापवैतीयोग्निरित्यनुमानेधूमवत्त्वान्यथानुपपत्तेरित्यत्रधूमःधूमो
ह्यग्नेःकार्यभूतःतदनावेनुपपद्यमानोग्निंगमयतिकश्चित्कारणरूपःयथावृष्टिर्नविष्यति
विशिष्टमेघान्यथानुपपत्तेरित्यत्रमेघविशेषःमेघविशेषोहिवर्षस्यकारणंस्वकार्यभूतंवृष्टिं
गमयतिःननुकार्यंकारणनुपमापकमस्कारणंनावेकार्यस्यानुपपत्तेःकारणंतुकार्यंनावेपि
संभवद्धियथाधूमानावेपिसंभवन्वह्निमनुमापयतीतिःअतएवतन्मात्रंलक्षणंगमयतीतिचेत्तन्नि
र्मलितशक्तिकस्यकारणस्यकार्यव्यभिचारितेनकार्यंप्रतिहेतुत्वाविरोधात्कश्चिद्विशेषरूप
यथावृष्टौयंशिंशपात्वान्यथानुपपत्तेरित्यत्रशिंशपाहिवृक्षविशेषःसामान्यभूतंवृक्षंगमयति

नहि हेत्वाभावेहेत्वविशेषेण घटतऽतिकश्चित्पूर्ववदुत्थानादेष्यतिज्ञाकटंकृतिकोदयान्यथानुपपत्तेरित्यत्रकृतिकोदयः कृतिकोदयानंतरंमुहूर्त्तेनियमेनज्ञाकटोदयोजायतेऽतिकृत्तिकोदयेनरवत्वरः यथाजरणुदितोकृतिकोदयान्यथानुपपत्तेरित्यत्रकृतिकोदयोहिजरणुदयोनरूपेणरवत्वरः तंगमयतिकश्चित्तमहरवरः यथामातुलिंगेरूपवद्गंधविशेषोमहतिरसवत्वान्यथानुपपत्तेरित्यत्रमरेरसोनियमेनरूपंमहत्त्वेतत्सदभावेसुपपद्यमानस्तमर्थयति ऐतेषुदाहरणेषुज्ञावरूपानेवप्रादीनुमाध्यंतोधूमादयोहेतवोज्ञावरूपाएवेतिविधिरूपाः ज्ञातएवविरुद्धोपलब्ध्यनुपलब्ध्योरुपयुज्यते एवंविधरूपस्यहेतोर्विधिसाधकस्याद्योभेदउदाहृतः द्वितीयस्तुनिषेधसाधकस्योविरुद्धोपलब्धिरितितस्यैवनामांतरंसंपद्यतेयथानास्यमिथ्यात्वंआस्तिक्यान्यथानुपपत्तेरित्यत्रास्तिक्यंआस्तिकोहिसर्वज्ञवीतरागप्रणीतज्ञीवादितत्वार्थरुचिलक्षणंएतन्मिथ्यात्ववतोनमंत्रवतीतिमिथ्यात्वाज्ञावंसाधयति यथावानास्तिवस्तुनिसर्वथैकांतःअनेकांतात्मकत्वान्यथानुपपत्तेरित्यत्रानेकांतात्मकत्वंअनेकांतात्मकत्वंहिवस्तुन्यवाधितंप्रतीतिविषयत्वेनप्रतिज्ञामात्रमानंसीगतादियरिकल्पितसर्वथैकांताज्ञावंसाधयत्येवकानुकिमिदमनैकांतात्मकत्वंयदुतावस्तुनिसर्वथैकांताज्ञावः साध्यतइतिचेदुच्यते।सर्वस्मिन्नपिजीवा-

२७

दिवस्तुनिज्ञावाज्ञावरूपत्वंमेकानेकरूपत्वंनित्यानित्यरूपत्वमित्येवमादिकमनेकांतात्मकत्वंएवंविधरूपीहेतुर्दर्शितः प्रतिषेधरूपोपिहेतुर्द्विविधः विधिसाधकः प्रतिषेधसाधकश्चेति।तत्राद्योयथाअस्यत्रपृथिव्यनित्यसत्यकृतकत्वात्यनित्यवत्।अत्रविपरीतान्नित्यवेज्ञाज्ञावः प्रतिषेधरूपः सत्यकसज्ञावंसाधयतीतिप्रतिषेधरूपोविधिसाधकोहेतुः द्वितीयोयथानास्यत्रधूमः अग्र्यनुपलब्धेरित्यत्रह्यग्र्याज्ञावः प्रतिषेधरूपोधूमाज्ञावंप्रतिषेधरूपमेवसाधयतीतिप्रतिषेधरूपः प्रतिषेधसाधकोहेतुः तदेवंविधिप्रतिषेधरूपतयाद्विविधस्यहेतोः कतिविदवोत्तरभेदाः इत्युच्यतेउदाहृताविर्मार्गतस्तुपरीक्षामुखतः प्रतिपत्तव्याः इत्यमुक्तलक्षणाहेतवः साध्यंगमयंतिनान्यथेहेतोस्तात्पर्यज्ञानात्तत्केतेहेत्वाभासाइतिचेदुच्यते।हेतुलक्षणरहिताहेत्वदवभासमानाहेत्वाभासाः।तेचत्रिविधाः असिद्धविरुद्धानैकांतिकाकिंचित्करभेदात्।तत्रानिश्चितपक्षधर्मोसिद्धः अनिश्चितपक्षधर्मताहेतोः स्वरूपाज्ञावनिश्चयात्स्वरूपंमंदेहाद्धूमस्वरूपाज्ञावनिश्चयेसतिस्वरूपासिद्धः स्वरूपमंदेहेमंदिमासिद्धः आद्योयथाप्रणामीज्ञात्रआत्मुपलब्धादितिज्ञात्रत्वद्विज्ञावनिश्चयेसतिस्वरूपासिद्धआत्मुपलब्धेहेतुः द्वितीयोयथाधूमवाप्रादिविवेकानिश्चयेकश्चिदाहअग्निमानयंप्रदेशोधूमवत्वादितिअ-

त्रहिधूमवत्त्वेहेतुः।सदिग्यामिद्रव्यत्वात्तत्स्वरूपेमंदेहात्माध्यविपरीतव्याप्तोविरुद्धः।यथाअयंपरिणामी
ज्ञातृत्वकृतकत्वादितिकृतकत्वंह्यपरिणामित्वेनव्याप्तं।यच्चविपक्षेवर्त्तते सपक्ष
कौतिकः।साहिविधः।निश्चितविपक्षवृत्तिकः।शंकितविपक्षवृत्तिकश्चातत्राद्योयथाधूमवानयंपुरु
शोऽग्निमत्वादित्यत्राग्निमत्वंयत्रीकृतेमंदिह्यमानेधूमेयुशेवर्त्तेनि।प्रदेशेवर्त्ततेमपक्षेधूमवतिमह
नमेववर्त्तते।विपक्षेधूमरहितत्वेननिश्चितंगोरावस्थायन्नाग्निमतिप्रदेशेवर्त्तता।इतिनिश्चयाग्नि
श्चितविपक्षवृत्तिकः।द्वितीयोयथागर्भस्थः।पुमान्मीमांसकत्वंहेतुमर्हतिमैत्रतनयत्वाद्वित्तिरत्तनयवदितिअ
त्रहिमैत्रतनयत्वंहेतुः।यत्रीकृतेगर्भस्थेवर्त्ततेमपक्षेऽतरत्युत्रेवतिवक्तव्याऽन्यापुरुषवत्ताऽतिव
कृत्वमहिहेतोः।यत्रीकृतेहितिमपक्षेरन्याःपुरुषेयथाहृत्तिरस्तिताथाविपक्षेसर्वत्रैपिवृत्तिःमंमा
तिवकृत्वज्ञातृत्वयोरविशेषात्।यद्विषयेनमहविशेषितत्वंलुतद्वतिनवर्त्ततेनचवचनज्ञानयोर्ल
केविशेषोस्तिपुनुतज्ञानेवचनमीहवंस्पष्टंदृष्टंततोज्ञानोत्कर्षेवतिमर्वत्रैवचनोत्कर्षेकानुपय
त्तिरिति।अथयोजकोहेतुरकिंचित्करः।साहिविधः।सिद्धसाध्यनैर्यौवाधितविषयश्चेति।तत्राद्योय
थाज्ञातृत्वंश्रावणेनत्वित्तुमर्हतिज्ञातृत्वादित्यत्रश्रावणत्वंयत्साध्यंज्ञातृत्वंनसिद्धत्वाद्धेतुरकिं २१
चित्करः।बाधितविषयत्वंनैकधाकश्चित्प्रत्यक्षबाधितविषयः।यथानुष्णोग्निर्द्रव्यत्वादित्यत्रद्रव्यत्वं

७ वर्त्तनेविपक्षेऽप्रसक्तेनर्त्तेनाग्निनेतिवृत्तिकाभावनिश्चयेशंकितविपक्षाव्यावृत्तिकः अपरस्य
पित्राकितविपक्षाव्यावृत्तिकस्योदाहरणं सर्वेसर्वज्ञोनन

DR BHAU DAJI

हेतुर्नसविषयत्वेनाग्निमतमनुष्णत्वमुष्णत्वाद्रव्यत्वेणवाधितंततःकिंचिदपिकर्तुमज्ञः
कृतकत्वादकिंचित्करोऽयंत्वहेतुः।कश्चित्पुनरनुमानबाधितविषयः।यथाअयंपरिणामीज्ञातृत्वकृतक
दित्यत्रपरिणामीज्ञातृत्वंप्रमेयत्वादित्यनुमानेनबाधितविषयत्वंकश्चिदागमबाधितविषयः।यथा
पित्रामुर्यंपुंधर्मः पुरुषाश्रितत्वादधर्मवदितिधर्मेसुखंपदंश्रुत्यागमस्तेनबाधितविषयत्वंहेतो
कश्चित्स्ववचनबाधितविषयः।यथामेमातावंध्यापुरुषमंयोगेसतिगर्भत्वात्।यद्विवंध्यावत्त
वमादयोपिकिंचित्करविज्ञेयाः।स्वयमूह्याःतदेवंहेतुप्रयोगाद्धेत्वाभासाअवगताःनानुव्युत्पन्न
प्रतिपत्तीपिप्रतिज्ञाहेतूदाहरणोपनयनिगमनावयवाःसंतथापिबालबोधार्थंदिङ्मात्रदर्शनार्थंकि
दाहरणंचसम्यग्दृष्टांतवचनंकोयंदृष्टांतोनामेतिचेदुच्यते।यत्रिमंप्रतियन्निपदेशेदृष्टांतः।या
प्रिहिमाधेवाद्यौमत्वेवसाधनेधूमादिरस्मिन्अग्नितुनास्तीतिमाधसाधनेनियतमाहचर्यलक्ष
णएनामेवसाध्यंविनासाधनस्यानुपपादविनानुपपत्तिरितिव्यपदिश्यतेतस्यांप्रतियन्निर्नाम
वादिनोर्बुद्धिमारूढेमेघादौमंनवतिमंप्रतियन्निपदेशः।महानसादिरुदाहरणं।तत्रिवधूमा
दौमतिनियमोनाग्न्यादिरस्यप्रत्ययनाविनियमेनधूमादिर्नास्तीतिमंप्रतिपत्तिमंनवात्।तत्रम
हानसादिरन्वयदृष्टांतः।अत्रसाधनयोर्नाविरूपान्वयंप्रतिपत्तिमंनवात्।उदाहरणमुपन्यिरिक

दृष्टांत॥ अत्र साध्यसाधनयोः स्वभावरूपयोरतिरेकः प्रतिपत्तिसंभवात् दृष्टांतेऽपेक्षितौ साध्यसाधनरूपौ यत्र दृष्टांतेऽत्यर्थमुद्भेदः प्रकाशः प्राप्यदृष्टांतस्य यत्र गृह्यते दृष्टांतः उदाहरणं न वचनमात्रमयं दृष्टांतः किंतु दृष्टांतत्वेन वचनं तद्व्याप्तौ साध्यसाधनौ यत्र वा साध्यसाधनाभ्यां व्याप्तं

लालचक्रादिकमंतरेणापि मंत्रविनोपटस्यकुलालादिकंकारणंएवंमैत्रीतनयत्वस्यज्ञप्तिमत्वंप्र
त्यकारणंत्वेनिश्चितेयत्रयत्रमैत्रीतनयत्वंनतत्रतत्रज्ञप्तिमत्वं॥किंतुयत्रयत्रज्ञप्तिमत्वस्यकारणं॥
विशिष्टनामकर्मानुगृहीतः॥ज्ञानाद्याहारयरिणामः॥तत्रतत्रज्ञप्तिमत्वंप्रतिव्याप्यत्वंप्रतिसमुप
देशेननिश्चीयतइतिसंदिग्धासिद्धः॥मैत्रीतनयत्वंस्वकारणत्वादेवज्ञप्तिमत्वंकार्यंनगमयेदितिके
वलिन्यूपाधिकः॥संबंधोव्याप्तिरित्यनिधायसाधनव्यापकत्वेसतिसाध्यसमव्याप्तिरुपाधिरित्य
निदधतेसोयमन्योन्याश्रयः॥यर्हिचितमेतदुपाधिनिराकरणंकारुण्यकलिकायामितिविरम्यते
साधनवत्तयापक्षस्यदृष्टांतसाध्यकथनमुपनयतत्रायंधूमवानितिसाधनानुवादपुरस्सर
मनियमवचनेनियमनंतस्मादग्निमानेवेतिअनयोर्व्यत्ययेनकथनमनयोर्नाम॥अवसितम
नुमानंअथआगमोलक्ष्यतेआप्तवाक्यनिबंधनमर्थज्ञानमागमः॥आप्तागमइतिलक्षंअविशिष्टं
लक्षणंअर्थज्ञानमितेतावदुच्यमानेप्रत्यक्षादावतिव्याप्तिः॥अतउक्तंवाक्यनिबंधनमितिवाक्य
निबंधनमर्थज्ञानमितुच्यमानेपियादृच्छिकसंवादिपुरुषेणनवाक्येषुमुमोन्मत्तादिवाक्यज
न्येषुकृतदीतीरफलसंभवंदिज्ञानेषुअतिव्याप्तिः॥अतउक्तमाप्तेतिआप्तवाक्यनिबंधनज्ञानमि
त्युच्यमानेप्याप्तवाक्यकर्मकेश्रावणप्रत्यक्षेतिव्याप्तिः॥तेनकेनअतउक्तंअर्थेतिअर्थस्यात्पर्यरूपइतिया

तस्यकार्यंस्मा
नलमितिसिद्धं
सामग्रीरूपस्य
विशिष्टनामक
नामकर्मणोनुग्र
हीतत्वात्कार्यो
त्पादनेसमर्थं

जन्ये
२३

वत्याप्तात्पर्यमेववचसीत्यनियुक्तवचनाच्चाप्तवाक्यनिबंधनमर्थज्ञानमितियुक्तमार्गलक्षणंनिर्दो
षमेवभवत्यासंसम्यग्दर्शनज्ञानचारित्राणिमोक्षमार्गइत्यादिवाक्यार्थज्ञानंसम्यग्दर्शनादीनांवै
कानिमोक्षस्यसकलकर्मक्षयस्यमार्गोपायःननुमार्गश्चितोनिर्लक्षणोनेत्यायाणंसमुदि
तानामेवमार्यत्वंननुपृथक्त्वमित्ययमर्थः॥मार्यइत्येकवचनप्रयोगात्पर्यासिद्धः॥अयमेववाक्या
र्थः॥अत्रेवार्थेप्रमाणसाध्यांशमयंनिर्वृत्तिःप्रमितिः॥कःपुनरयमाप्तइतिचेदुच्यते॥आप्तः प्रत्य
क्षप्रमितिसकलार्थत्वेसतिपरमहितोपदेशकःप्रमितेत्यादावेवोच्यमानेश्रुतकेवलिप्रभृतिव्या
प्तिः॥अतउक्तंपरमेत्यादिपरमंहितंनिःश्रेयसंतदुपदेशएवार्हतःमैवंवतिप्रामुख्येनप्रवृत्तिर
न्यत्रतूपचारादुपसर्जनत्वेनेतिनात्रनैवंविधिप्रसिद्धः॥परमेष्टीतस्यानुपदेशकत्वान्नतो
नेनविशेषणेनातिव्याप्तिः॥आप्तप्रज्ञावेप्रमाणमुपन्यस्तंनैयायिकाद्यभिमतानामीश्वरादीनां
सर्वज्ञत्वात्सकलप्रमितेत्यादिविशेषणेनेवनिरासः॥ननुनैयायिकाभिमतआप्तःकुतोनसर्वज्ञ
इतिचेदुच्यते॥तस्यज्ञानस्यास्वप्रकाशकत्वाद्यविशेषणयुक्तंस्वकीयंज्ञानमेवंजानातीति
तद्विशिष्टआत्मानंसर्वज्ञोहमितिकथंजानीयात्॥एवमनात्मज्ञोयमसर्वज्ञएवपूर्वंचितंचसुग
तादीनामप्याप्तानामत्वमाप्तमीमांसाविवरणेश्रीमदाचार्यपादैरतिविरम्यते॥वाक्येषुतंत्रोक्तो

मिह्रमितिनेहलक्ष्यते॥अथकोयमर्थोनामेत्युच्यते॥अर्थोनैकांतः॥अर्थइतिलक्षनिर्देशः॥अनि
धेयइतियावत्॥अनेकांतइतिलक्षणकथनंअनेकोंताधर्माःसामान्यविशेषपर्यायगुणाय
स्तेतिसिद्धोनैकांतः॥तत्रसामान्यमनुवृत्तिरूपंतद्घटत्वंपृथुबुध्नोदराकारःगोत्वमितिसास्ना
दिमत्वमेवतत्सामान्यव्यक्तीस्तंतमन्यन्तित्यमेकमनेकवृत्तिरन्यथानयातिनचतत्रास्तिनपश्या
दभिन्नेनांशवत्॥जहातिपूर्वंनाधारमहोव्यमनुध्रुवंतिरितिदिग्गादशितिरूपणगणप्रसरप्रमे
गात्पृथुबुध्नोदराद्याकारादिदर्शनानंतरमेवघटोयंघटोयंगौरयंगौरयंमित्याद्यनुवृत्तप्रत्यय
मंनवात्॥विशेषोपिस्थूलोयंघटःसूक्ष्मइत्यादिप्रत्ययालंबनंघटादिरूपंमेवतथाचाहभगवा
न्माणिक्यनंदिनदारकः॥सामान्यविशेषात्मातदर्थः॥इतिपर्यायोद्विविधः॥अर्थपर्यायोव्यंजन
नपर्यायश्चेति॥तत्रार्थपर्यायःसूक्ष्मऋजुसूत्रवचनगोचरापन्नस्वसमयनियतस्वरूपवर्त्तमानकालावछिन्नवस्तु
स्वरूपंतदेतदनुसूत्रयन्नाहनयविषयसामर्थ्ययुक्तः॥एतदेकदेशावलंबिनःस्वलुसौगता
क्षणिकवादिनःव्यंजनंव्यक्तिःपृथुबुध्नोदरादिनिर्वृत्तिनिबंधनजलानयानाद्यर्थक्रियाकारित्वंतेनोयल
क्षितःपर्यायोव्यंजनपर्यायःमृदादेःपिंडस्थासकोशकुशूलघटकपालादयःपर्यायाःयावद्द्रव्यभाविनःसकलांपर्यायानुवर्त्तिनोगुणाःवस्तुनोरूपरसगंधस्पर्शादयःमृद्द्रव्यसंबंधिनो

हिवस्त्वादयःपिंडादिपर्यानुवर्त्तेतेनतुपिंडादयःस्युर्भेदीनां॥ततएवयेपर्यायाएवंगुणेभ्यो
नेदेनपिसामान्यविशेषपर्यायो॥तथापिमंकेतयहणनिबंधनत्वात्तद्व्यवहारविषय
त्वाद्द्रव्यमप्युच्यतेयोएष्टृभिर्देशःतदनयोगुणियर्यायोर्द्रव्यमाश्रयःगुणपर्ययवद्द्र
व्यमित्याचार्यानुशासनात्तदपिजीवद्रव्यमजीवद्र
व्यंचेति॥संक्षेपतोद्विविधंद्रव्यमपेतदुभयविनाभिस्थितियोगिनत्यंद्रव्यध्रौव्यसंयुक्तमितिनि
रूपणात्॥तथाहिजीवद्रव्यस्यस्वपर्यायप्रापकपुण्योदयेमतिमनुष्यस्वभावस्यव्ययःदिव्यस्वभाव
सोत्पादःचैतन्यस्वभावस्यध्रौव्यमितिजीवद्रव्यस्यसर्वथैकरूपेपुण्योदयवैकल्यप्रसंगात्॥सर्वथा
नेदेपुण्यवानन्यफलवानन्यइतिपुण्यसंयादनवेद्यत्वप्रसंगात्॥परोपकारेणात्मसुकृतार्थमि
वाप्रवर्त्तनात्॥तस्माज्जीवद्रव्यरूपेणानेदःमनुष्यदेवत्वपर्यायरूपेणनेदइतिप्रतिनियतनय
निरूपणविरोधेनानेदोप्रामाणिकोवेवात्तथेवाजीवद्रव्यस्यापिमृदःपिंडाकारस्यव्ययःएवंध्रु
ध्रौव्यराकारस्योत्पादःमृद्रूपस्यध्रुवत्वमितिभिन्नमुत्पादादियुक्तंजीवद्रव्यस्वामीसमंत
नद्राचार्यानिमतानुसारीवामनोपिमदुपदेशादपिप्राक्तनज्ञानस्वभावंहेयमुपरितनज्ञानस्वभा
वंस्वीकर्त्तुंचयःसमर्थआत्मासएवज्ञास्वाधिकारीत्याहाज्ञास्वभावेत्यर्थवदतितदेवमनेकां

तात्मकं वस्तुप्रमाणवाक्यविषयत्वादर्थत्वेनावतिष्ठते॥तथाचप्रयोगः॥सर्वमनेकांतात्मकंस-
त्वात्॥यदुक्तं॥साधनंनतद्धीकृत्साधनंयथागगनारविंदमिति॥ननुयद्यप्यरविंदंगगनेनास्त्येव-
तथापिसरस्यस्तीतितत्तोनसत्वरूपहेतुव्यावृत्तिरितिचेत्॥तर्हितेतदरविंदमधिकरणवि-
शेषापेक्षयामदमदात्मकमनेकांतमित्यत्वयदृष्टांतत्वंनवतैवप्रतिपादितमितिसंतोष्टव्यमा-
युष्मता॥उदाहृतवाक्येनापिसम्यग्ज्ञानदर्शनचारित्राणांमोक्षकारणत्वमेवनसंसारकारण-
त्वमिति॥विषयविभागेनकारणैकांतंप्रतिपाद्यतेसर्ववाक्यंसावधारणमितिन्यायात्॥एवं
प्रमाणमिदमनेकांतात्मकंवस्तु॥नयाविज्ञातोननुकोयंनयोनामाभिधीयते॥प्रमाणगृहीता-
र्थैकदेशग्राहीप्रमातृनिप्रायविशेषः॥तत्रयोज्ञातृरभिप्रायइत्यभिधानात्॥सनयः संक्षेपि-
णद्विधाद्रव्यार्थिकनयःपर्यायार्थिकनयश्चेति॥तत्रद्रव्यार्थिकनयःद्रव्यपर्यायरूपमे-
कानेकात्मकमनेकांतंप्रमाणप्रतिपन्नमर्थंविभज्यपर्यायार्थिकनयविषयस्यानेकस्वभाव
र्जनाभावेनावस्थानेमन्यमानोनानुजानन्॥स्वविषयंद्रव्यमनेदमेवव्यवहारयतिनयांतरविषयमपेक्ष
मन्यइत्यभिधानात्॥यथासुवर्णमानयेतिप्रेरितस्तत्रद्रव्यार्थिकनयाभिप्रायेणसुवर्णद्रव्यमानयति॥न
चोदनायांकटकंकुंडलंकेयूरंचोपनयमनुपपद्यमानंतदाकृतीनवतिसुवर्णरूपेणकटकादीनांनेदा-

मात्र

भावात्॥द्रव्यार्थिकनयमुपमृज्यनीकृत्यप्रवर्त्तेमानपर्यायार्थिकनयमवलंब्यकुंडलमानयेत्युक्ते
नकटकादीप्रवर्त्तेतेकटकादिपर्यायात्॥कुंडलपर्यायनिष्पत्तात्॥ततोद्रव्यार्थिकनयाभिप्रायेण
सुवर्णंस्यादेकमेवपर्यायार्थिकनयाभिप्रायेणस्यादनेकंमेवऋजुमेणिनयविशिष्टत्वात्॥ततोद्र
व्यार्थिकनयाभिप्रायेणसुवर्णंस्यादेकमेवपर्यायार्थिकनयाभिप्रायेणस्यादनेकंमेवऋजुमेणिन
कमनेनयाभिप्रायेणस्यादेकंचयुगपदुभयनयाभिप्रायेणस्यादवक्तव्यंयुगपत्॥प्रापितनयभेद्ये
नविविक्तस्वरूपयोरेकत्वानेकत्वयोर्विमर्शसंनवात्॥नहियुगपदुपनतेनज्ञाद्वयेनघटस्यप्र-
धानभूतयोरूपवत्त्वमवत्वयोर्विविक्तस्वरूपयोः॥प्रतिपादनेज्ञाक्यंतदेतदवक्तव्यस्वरूपंतत्त
दभिप्रायेरूपनतैरेकत्वादिनासमुचितंस्यादेकमवक्तव्यंस्यादनेकमवक्तव्यंस्यादेकानेकमव
क्तव्यमितिस्यात्॥सैषानयविनियोगपरिपाटीसप्तनंगीत्युच्यते॥नंगज्ञाद्यस्यवस्तुस्वरूपनेदवाच
कत्वात्तत्प्राप्तानांनंगानांसमाहारः॥सप्तनंगीतिसिद्धेः॥ननैकत्रवस्तुनिसप्तनंगानांकश्चंसंनवइ-
तिचेत्॥यथैकस्मिन्नप्रूपवानुघटःरसवानुगंधवानुस्पर्शवानितिएकत्रव्यवहारनिबंधना
रूपवत्त्वादिरूपनेदाःसंनवंतीतितथैवेतिसंतोष्टव्यमायुष्मतापुनरेवपरमद्रव्यार्थिकनया-
भिप्रायविधयः॥परमद्रव्यंसत्तानेदेनैकमेवाद्वितीयंब्रह्मनेहनानास्तिकिंचनसद्भेदेनचेतना-

Digitized with financial assistance from the Government of Maharashtra on 11 June, 2017

नामचेतनानांनेदाभावात्।।नेदंतुसद्विलक्षणत्वेनतेषांममत्वप्रमंगात्।।ऋजुसूत्रनयस्यवरमयर्थ
यार्थिकः।।सहिसूतत्वनविष्यत्त्यांभयरामृष्टंशुद्धप्रवर्त्तमानकालावच्छिन्नंवस्तुस्वरूपंयरामृशः।
तितन्नयानिप्रायेणबोधनिप्रायेणकलसिद्धिः।।एतेनयानिप्रायः।।सकलस्वविषयाशेषात्मक
मनेकांतंप्रमाणविषयंविनप्यवहारयंतिस्यादेकमेवद्रव्यमात्मनावस्तुसन्नस्तुनानास्पान्नाव
पर्य्यायात्मनानेकमितितदेतत्प्रतिपादितमाचार्यसिमंतनद्रस्वामिनिः।।अनेकांतोप्यनेकांतः प्रम
णनयसाधनः।।अनेकांतःप्रमाणंतेकांतोर्पितान्नयात्।।इति।।अनियतानेकधर्मवद्व
स्तुविषयत्वात्।।प्रमाणस्यनियतैकधर्मवद्वस्तुविषयत्वान्नयस्यदेनामाहैतीमरणीमुलं
घ्यसर्वथैकमेवाद्वितीयंब्रह्मानेहनानास्तिकिंचनकश्चिदपिनानेत्यायहः।।स्यात्।।तदेतदणीयः
एतत्प्रतिपादकमपिवचनमागमाभासः।।प्रत्यक्षेणप्रसिद्धेनिदातयैलेनिदेत्यादिनैगमेनैचबाधित
विषयत्वात्सर्वथानेदएवनकश्चिदप्यनेदइत्यत्रापैकमेवविज्ञेयं।।सद्रूपेणापिनेदेसतः।।अर्थक्रि
याकारित्वलक्षणंनवात्।।ननुप्रतिनियताभिप्रायगोचरतयाएवमात्मनांपरस्परंसाहचर्यानपेक्षायां
मिथ्यात्वतानामेकत्वादीनांधर्माणांसाहचर्यलक्षणमुदायोपिमिथ्यैवेतिचेत्तदेगीकुर्म्महेपरस्प २६
रोपकार्य्योपकारकभावंविनासतंत्रतयानैरपेक्षापेक्षायांयटस्वभावविमुक्तंतंत्रममूहस्वभावतनि

नेकत्वा

रपेक्षाणांद्यर्थक्रियावदेकत्वानामर्थक्रियायोमामर्थीभावात्कश्चिन्मिथ्यात्वस्यापिसंभवात्तदुक्त
मामप्तमीमांसायांस्वामिसमंतनद्रेणाचार्येणमिथ्यासमूहोमिथ्येकांततास्तिनः।।निरपेक्षानय
यामिथ्यासापेक्षावस्तेर्थक्रदिति।।१।।ततोनयप्रमाणान्यांवस्तुसिद्धिरितिसिद्धं।।सिद्धांतःप
र्य्यप्तिमागमप्रमाणं।।१।।इतिश्रीमद्वर्द्धमाननद्दारकआचार्यगुरुकारुण्यसिद्धसारस्वतोदयश्री
मदनिनंदनधर्मभूषणाचार्यविरच्यतोयंन्यायदीपिकायांमागमप्रकाशः समाप्तः।।समाप्तचेयं
न्यायदीपिकाशुभंभवतुः।। ।।लेखकपाठिकचिरंजीयात्।।शुभंभवतुः।।